श्रीआत्मानन्द-ग्रन्थरत्नमाला-पञ्चविंशं रत्नम् (२५)

# चेतोदूतम् ।

तच्च

योधपुरवास्तव्येन दाधीच (दाधिमथ)-कासल्यो-
पाख्य-माधवकवीन्द्रनन्दनेन आशुकवि-
नित्यानन्दशास्त्रिणा संशोधितम् ।

प्रवर्त्तकश्रीमत्कान्तिविजयशिष्यश्रीमच्चतुरविजयोपदिष्ट-
पत्तनवास्तव्यश्रीमालिज्ञातीयश्रेष्ठि-वस्ताचन्दात्मज-
भीखाचन्द-द्रव्यसाहाय्येन-

प्रकाशयित्री

भावनगरस्था श्रीजैनआत्मानन्दसभा.

वीरसं. २४४० आत्मसं. १८ विक्रमसं १९७०

Published at Bhavanagar by Vallabhadas Tribhuwandas Gandhi, Secretary, Jaina Atmanand Sabba, Bhavanagar.

Printed at the "Lakshmi Vilas" Press Co. Ltd. by C. L. Patel in Bahu Kale's lane Baroda, for the Publisher 25-4-14.

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ अर्हम् ॥

॥ श्रीमद्विजयकमलसूरीश्वरपादपद्मेभ्यो नमः ॥

# चेतोदूतम् ।

( मन्दाक्रान्तावृत्तम् )

ते[1] जीयासुर्जगति गुरवः प्रौढपुण्यप्रभावा
भास्वद्रूपे[2] प्रतपति भृशं यत्प्रतापे प्रतप्ताः ।
दीना वादीश्वरसमुदयाः कुर्वते तापशान्त्यै
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

संयोगार्थी गुरुपदभुवो वल्लभायाः प्रसक्तेः
शिष्यः कश्चित् समदमिह दुर्वारणं स्वैरचारम् ।
चिन्तायोगात् सुचिरमचलस्वात्मनिष्ठं मनः स्वं
वप्रक्रीडा[3]परिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्याः साक्षादिव हुतवहादुस्सहाद्विप्रलम्भात्
प्राप्तोत्कर्षात् स भृशमभवद्भूरिसंतापतप्तः ।

---

१ 'सर्वाभ्युदयमूलतया श्रीगुरूनेव परमदैवतं मन्यमानास्तेषां सर्वोत्कर्षेण वर्तमानतामाशीर्वादपूर्वं पूर्वमाह ' इत्यवतरणिका आदर्शपुस्तके टिप्पणीकृताऽस्ति । २ भास्वद् देदीप्यमानं रूपं यस्य पक्षे भास्वतः सूर्यस्य रूपं यस्येति तत्र । ३ आत्मनो गिरित्वारोपणात्तन्निष्ठं चेतो गजत्वारोपणेन वप्रे गिरितटे क्रीडया तिर्यग्दन्तप्रहारिगजवत् प्रेक्षणीयं दर्शनीयम् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रायो गाढं भवति विरहाशङ्कयाऽप्यत्र दुःखं
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥
निश्शेषार्थप्रथननिपुणं चित्तमेतत्तदस्मात्
स्वाभीष्टं मे नियतमचिरात्सिद्धमेवेति मत्वा ।
दत्तार्घाय प्रमदजनितैर्बाष्पपूरैः स तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥
चेतः क्लीवं[4] गतवलतया नैव कार्यक्षमं य-
चैतन्येनापि हि विरहितं पुद्गलात्मत्वतो वा ।
स व्यामूढस्तदपि सहसारोप्य पुंस्त्वं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥
त्वय्यायत्तं ननु तनुमतामत्र दुःखं सुखं वा
त्वत्तो नान्यो जगति सकले कश्चिदास्ते महीयान् ।
तेनाहं त्वां परहितरतं प्रार्थये स्वार्थसिद्ध्यै
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥
गन्तव्या सा चरणयुगलन्यासपूता गुरूणां
कीर्त्तिज्योत्स्नाबहुललहरीक्षालिताऽशेषदेशा ।
पूः संपूर्णा धनपतिधनैर्यालकेवाऽस्ति रम्या
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

---

१ अर्थः कार्यं शास्त्रार्थश्च । २ प्रीत्या स्नेहेन प्रमुखं प्रधानं वचनं यत्रेति। ३ स्वागतं विशेषणं क्रियाविशेषणं वा । ४ क्लीवं असमर्थं नपुंसकं च । ५ बलं शुक्रं शौर्यं च । ६ पुद्गलानामचेतनत्वाच्चैतन्येन विरहितम् । ७ पुंस्त्वं पुरुषत्वं पुल्लिङ्गत्वं च । अत्र चित्तस्य पुंस्त्वारोपणादग्रे सर्वत्र चित्तविशेषणानि पुल्लिङ्गतया ज्ञेयानि । ८ प्रकृतिकृपणाः स्वभावतो दीनाः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दुर्लक्षं त्वां कथमपि समालम्ब्य तत्त्वार्थसिद्ध्यै
प्रौढिं प्राप्ता अपि निरुपमां योगिनोऽप्युत्सहन्ते ।
स्वाभीष्टार्थाधिगमविषये कः प्रतीक्षेत धीमान्
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

पूर्वं काव्यद्वयेन चित्तस्य प्रलोभनाय भाविप्रियालाभ-
दर्शनपूर्वकं स्वकार्यमुद्दिशति—

संयोगेनानणुगुणमहाम्भोनिधीनां गुरूणां
प्राप्तौन्नत्यं जगति बहुधान्योपकारैकनिष्ठम् ।
विज्ञानश्रीप्रभृतिललनास्तत्र यद्वत्पयोदं
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥

भ्रातः ! स्वान्त ! व्रज निजगुरून् सम्यगाराधय त्वं
तां च प्रीत्याऽनुनय दयितामाशया जीवतो मे ।
आशाबन्धः किल धृतिकरः प्रायशो दुःखितानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

अथ सहायलाभेन चित्तमुत्साहयति—

एते गङ्गासलिलविमलैः कीर्त्तिपूरैर्विवेकात्
सर्वोत्कृष्टादपि च गुरुभिर्यर्ज्जिता विश्वपूज्यैः ।

---

१ अधिगमः प्राप्तिः । २ यद्वद् बलाकाः खे आकाशे मेघं सेवन्ते तथा ज्ञानश्रीप्रभृतिस्त्रियस्तत्र पुर्या बहुधा अन्योपकाररतं भवन्तं त्वां सेविष्यन्ते । अम्भोधिना च मेघ उन्नतिं प्राप्नोति, तथा बहुधान्यानां उपकार एकनिष्ठो भवतीत्यतस्तेन साम्यम् । ३ आशाबन्धो वियोगे दुःखितानां सद्यः पतनशीलं प्रणयि स्नेहयुक्तं हृदयं रक्षतीत्यर्थयोजना ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तन्[1]मन्येऽहं ननु जिगमिषोः सेवनार्थं प्रयान्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥
अथ त्रयोविंशत्या काव्यैश्चित्तस्य समुत्साहनाय श्रीगुरु-
राजान् वर्णयति—
दोषा[2]वाप्तौ दधदनुदिनं शोकमस्तोकमुच्चैः
सच्चक्रैः[3] स्यात्कथमिव न हि श्लाघनीयः स यस्य ।
योगे जाते भवति महतां भास्वतामत्र येषां
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥
गङ्गातीरे त्रिनयनजटाजूटदेशे शशाङ्कः[4]
शङ्के स्थित्वाऽन्वहमपि तपस्तप्यते वृद्धिहेतोः ।
भूयो भूयो यदसमयशःस्पर्द्धनोद्भूतपापात्
क्षीणः क्षीणः परिलघु पयः श्रोतसां चोपभुज्य ॥१३॥
सद्वृत्तश्रीर्द्विजप[5]तिरिवामात्रपावित्र्यशाली
त्रैलोक्येऽपि प्रसरातितरां यद्गुणानां समूहः ।
मातं[6]ङ्गा मामिह निजकरैर्मा स्पृशन्त्वित्यमीषां
दिङ्नागानां पथि परिहरन् स्थूलहस्ताँ[7]वलेपान्॥१४॥

---

१ यतः कीर्तिविवेकाभ्यां राजहंसाः श्रीगुरुभिर्जिताः, ततोऽहं मन्ये ते श्रीगुरूणां सेवनार्थं प्रयान्तो राजहंसा भवतस्तव जिगमिषोः सहायाः संपत्स्यन्ते । २ दोषाणां दूषणानां पक्षे दोषाया रात्रेरवाप्तौ । ३ सतां चक्रः समूहः पक्षे संश्चासौ चक्रः चक्रवाकः । ४ चन्द्रः अतिकष्टं यथास्यादेवं शिवजटाजूटदेशे स्थित्वा श्रोतसां परि समन्ताल्लाघवोपेतं पयो जलं उपभुज्य च पीत्वा तपस्तप्यते इति संबन्धः । ५ द्विजपतिश्चन्द्रो ब्राह्मणश्च । ६ मातङ्गा हस्तिनश्चाण्डालाश्च । ७ पीवरकरग्रहान् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वादे[1]क्षिप्ताखिलपरहरिदुर्यशोराशिभाजा
रक्त[2]श्वेतप्रसृमरमहःकीर्त्तिपूरेण येषाम् ।
आकाशस्य प्रसरतितमां श्यामै[3]वर्णस्य शोभा
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥
कारुण्यार्द्रा अभिदधति ये वत्सला भव्यलोकं
चेत्पापस्योपरममचिरादीहसे दुःखभीरुः ।
यस्माद्भावात्कृतमिदमनेनैव शुद्धेन तद्[4]भोः !
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥
श्रीभास्वन्तो जगदुपकृतावुद्यता स्मेर[5]पद्मं
श्लाघ्यं लब्ध्वोदयमनुदिनं प्रीणयन्ति प्रपन्नम् ।
सच्चक्रं ये प्रथितमहसः कोऽथ वाऽन्योऽपि काले
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥
दक्षाः शिष्या निभृतमनसो ये विवेकप्रवेकाः
भक्तिं स्तोकामपि विदधते शुद्धभावेन युक्ताः ।

---

१ वादे क्षिप्तानां पराजितानां अखिलानां परेषां वादिनां यो हरित् (हरिन्नीलश्यामानामैक्यात्) श्यामो दुर्यशोराशिः तं भजति स्म तेन, तत्संगतेनेति भावः । २ नीलरक्तश्वेतपरदुर्यशो यन्महः कीर्तिपुरस्य वर्हस्य च मयूरपिच्छस्य सादृश्यं । ३ आकाशस्य विष्णोश्च साम्येन । ४ तत् तस्मात् कारणाद् भो भव्य लोक ! यस्माद् भावादिदं पापं कृतं अनेनैव शुद्धेन उत्तरेण प्रधानेन भावेन पश्चाद् व्रज निवर्त्तस्व प्रतिक्रमं कुरुष्वेति योज्यम् । ५ स्मेरा पद्मा श्रीर्ज्ञानादिसंपत् पक्षे पद्मानि कमलानि यत्र तं उदयं लब्ध्वेति योजना ॥

P. P. Ac. Gunratansuriji M.S.  Jin Gun Aaradhak Trust

तान् दुष्पापामपि सपदि ये प्रापयन्ति प्रतिष्ठां
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १८ ॥
लोकप्रान्तास्फलनवलनातिपिण्डितः पाण्डुरद्युत्
कीर्तिस्तोमः[1] परमसुभगः प्रोन्नतो भाति येषाम् ।
स्फूर्जत्यूर्ध्वं जलदमलिने वादिदुष्कीर्त्तिपुञ्जे
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१९॥
सर्वाकाशे हरिति लुठितां केतकीश्वेतपत्रै
दीर्घोन्निद्रैरिव[2] सुघटितां कीर्त्तिपङ्क्तिं यदीयाम् ।
अत्याश्चर्यापहृतमनसः के न पश्यन्ति शश्वद्
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥
संख्यातीतैरतिगुरुतरैर्यद्गुणैर्गाढपूर्णा
निस्सामान्यं दधति भुवने गौरवं ये यतीन्द्राः ।
तद्राहित्यादिह च लघुतां यत्परे तेन युक्तं
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२१॥
स्तुत्या साक्षात्कृतिभिरिति ये[3] कैर्नये श्रीघनं त्वां
संसेवन्ते व्यपगतशुचः संवरेणापतृष्णाः ।

---

१ येषां पाण्डुरः कीर्तिपुञ्जः कृष्णे वादिदुष्कीर्तिपुञ्जे उपरि स्फूर्जति सति भुवः स्त्रीरूपायाः शेषविस्तारपाण्डुः मध्ये श्यामः स्तन इव भातीति संबन्धः । २ इवेत्युत्प्रेक्ष्यते–गजस्याङ्गे भक्तिच्छेदैर्नागबन्धादिचित्रविशेषै रचनाखण्डैर्विरचितां भूतिमिव रक्षामिव । ३ ये गुरवः कैः कृतिभिः पण्डितैरिति साक्षान्न स्तुत्या अपि तु सर्वैरपि; इति कथम् ? तदाह—ये शिष्याः सारङ्गाः चातकाश्च त्वां श्रिया घनं श्रीघनं मेघं च संसेवन्ते, ते

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्निग्धारावं परमकृपया साधु विस्तार्य शुद्धं
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२२॥
चारित्रश्रीर्निरुपमगुणा सर्वसौख्यैकहेतु-
स्तस्यां लीनं कथमपि तथा चित्तमेतद्यदीयम् ।
नैवायान्ति क्वचिदपि यथा स्वप्नमध्येऽपि किञ्चित्
सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २३ ॥
एतत्सत्यं यदिह रिपवो रागरोषादिकास्ते
पापा नैवोच्छ्वसितुमपि हे भद्र ! किञ्चिद्दर्दन्ते ।
लङ्घित्वा तांस्तदपि विशदे धर्ममार्गे गुणौघैः
प्रत्युद्यातैः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥२४॥
अन्तर्दृष्ट्या विमृशसि न किं देहिनो ये तडागाः
पुण्येऽम्भोदे प्रभवति भवद्वैभवाम्भःप्रपूर्णाः ।
पापे ग्रीष्मेऽभ्युदयिनि पुनस्तेऽप्यहो ! क्षीयमाणाः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२५॥

---

शिष्याः कृपया बाष्पजललवमुचः स्निग्धारावं यथास्यादेवं गा वाचो विस्तार्य आवर्त्य ते तव सारं शुद्धं मार्गं सूचयिष्यन्ति । मेघपक्षे ते सारङ्गाः चातकाः स्निग्धारावं विस्तार्य ते तव जललवमुचो जलधरस्य मार्गं सूचयिष्यन्ति ॥

१ 'दद दाने' इति भौवादिकस्य रूपम् । २ ( गुणौघैः ) प्रत्युद्यातः कृताभ्युत्थानः । ३ व्यवस्येद् उद्यमं कुर्यात् ४ हंसा जीवा मरालाश्च कतिपयदिनस्थायिनो हंसा येषु ते । ५ दशार्णा दशामवस्थां अर्णाः प्राप्ताः । ( तडागरूपा देहिनः ) इति योज्यम ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

यद्वा—

रक्तो देहेष्वपि च विविधैर्भोजनस्नानभूषा-
संस्काराद्यैर्गमयसि दिनान् किं मुधैव प्रमत्तः ।
नो जानीषे किमिति यदमी ग्रीष्मतोयाशयाभाः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२६॥
येषामेवं रुचिरवचनैर्ज्ञाततत्त्वः प्रशान्त-
स्वान्तः साम्यामृतमनुपमं निर्वृतेरेकहेतुम् ।
भव्यो लोकः पिबति मुदितः स्वादु यद्वत्तृपार्त्तः
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २७ ॥
त्रिभिर्विशेषकम् ॥
साक्षात्प्रख्यापयति परमैश्वर्यलीलाविशेषो
येषां भाग्यान्यनुपमतमैर्वैभवैरद्भुतानि ।
क्रीडाभूमीधर इव रतव्यञ्जकैर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २८ ॥
तापव्यापत्प्रशमनरताः कुर्वते निर्वृतिं ये
सर्वेषामप्यविनयवतामाश्रितानां न चित्रम् ।
पुष्पादानेष्वपि हि सुखदः किं न मन्दारवृक्ष-
श्छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥२९॥
स्त्रीणां सङ्गो भवति महते दोषपोषाय येषां
सम्यक् तत्त्वाधिगतमनसामेष एवोपदेशः ।

---

१ वेत्रवती नदी स्त्री च । वेत्रवत्याः स्त्रियः सभ्रूभङ्गं मुखमिव वेत्रवत्या नद्याश्चलोर्मिपयः पिबति॥ २ सुरतसूचकैः (वैभवस्थानीयैः शिलावेश्मभिः) ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अन्येषां तु प्रतिहतधियामेष यत्कामिनीनां
लीलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥३०॥
धीरत्वाधःकृतसुरगिरीन् यान् विना नैव कश्चित्
शक्तः सोढुं युवमृगदृशां दुःसहान् दृग्विलासान् ।
यस्माद्विश्वाद्भुतसुभगताशालिनीनाममोघं
स्त्रीणामाद्यः प्रणयवचनं विभ्रमो हि प्रियेषु ॥ ३१ ॥
येषां साक्षादिव जलमुचां[1] संवरापूरितानां
विज्ञाः के के न खलु रचयन्त्यत्र विज्ञप्तिमित्थम् ।
स्फीताप्येषा गुणततिसरित्त्वद्वियोगात्तनिष्ठा
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥३२॥
सान्द्रानन्दैर्विबुधनिवहैः सेव्यमाना समन्ता–
न्नानाभेदैः प्रतिदिनभवैरुत्सवैरुज्ज्वलश्रीः ।
येषामेषा शुभति[2] सुभगास्थानभूर्भूतलस्था–
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥३३॥
अस्यंस्तापं प्रसृमररसः प्रीणयन् सङ्गमेन
स्निग्धोऽत्यन्तं वशयति नृणां चित्तवृत्तीः सुकान्ताः ।
येषां प्रेङ्खद्वचनविसरः शीतलत्वास्तसाम्भः–[3]
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३४ ॥

---

१ जलमुचामिव येषां संरावपूरितानामिति संबन्धः । संवरो हि मुनीनां प्रसिद्धः, मेघ पक्षे तु संवरं जलम् । २ शुभति राजते । तौदादिकस्य शुभे रुपमिदम् । ३ शीतलत्वेन अस्तः तिरस्कृतः साम्भः जलसंपृक्तः सिप्रा (नदी) वातो येन तथोक्तो येषां वचनविसरो रसवत्त्वेन, कान्तारूपाणां चित्त-त्तीनां वशीकरणेन च प्रियतम इवेति भावः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सारोदारानणुगुणमणिश्रेणिकोटीरनन्ताः
संख्यातीतान् पुनरनुपमान् वृत्तमुक्ताफलौघान् ।
दृष्ट्वा येषु प्रस्मरमहःश्लाघनीयप्रवालान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३५ ॥

अथ सप्तभिः काव्यैर्नगरवर्णनगमनयुक्तिदर्शनपुरस्सरं
स्वाभीष्टलाभादिना चित्तं प्रलोभयति—

एते शीतद्युतिसितयशः पूर्णसंपूर्णविश्वाः
श्रीसूरीन्द्राः सकलजगतां वन्द्यपादारविन्दाः ।
अन्ये चैते गुणजलधयस्तद्विनेयाः समन्ता-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥३६॥

यत्रामात्रैः स्फुरति महिमा कोऽप्यहो ! श्रीगुरूणां
सम्यग्धर्मे विषयविमुखा येन तेऽपि श्रयन्ते ।
क्रीडन्ति स्मानुदिनमपि ये मन्दिरेषु स्मरोत्थं
नीत्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३७ ॥

यस्मिन् पथ्यैः सुगुरुवचनैः शान्तकामज्वराणां
तेषां पुंसां तदपि निखिलं दुःखमेवावभाति ।
येऽमन्यन्त प्रसभसुरतश्रान्तिमन्तः सुखं य-
त्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३८ ॥

चेतस्तस्मिन् व्रज पुरवरे पावने श्रीगुरूणां
स्थित्या तेषाममृतमधुरान् देशनाया निनादान् ।

१ अपरिमितः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सम्यक् शृण्वन् श्रुतिसुखकरान् जन्मनस्त्वं समाना-
नामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३९॥
श्रीमत्सूरीश्वरपरिचयात्सिद्धचूर्णादिवाप्तात्[1]
कान्तत्वं[2] ते सपदि भविता स्वान्त ! तद्येन पश्चात् ।
गाढोत्कण्ठा वरगुणरमापक्ष्मलाक्ष्यः सलीला-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥४०॥
तत्र भ्रातस्तदनु विजयानन्ददायाः प्रियाया
बुद्धेः सत्याः शिवे[3] इव भवान् लप्स्यते निर्विलम्बम् ।
गाढाश्लेषं समहिमगुणे श्रीगुरौ गौरवार्हे
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः ॥ ४१ ॥

यथा च—

श्रीसूरीन्द्रान् विनयविधिभिः सेवमानः प्रशस्तै-
र्ज्ञातोत्साहः स्फुटमपि धिया लप्स्यसेऽभीष्टसिद्धिम् ।
अर्चन् लङ्केश्वर इव शिवं नव्यलूनैः शिरोभिः
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः ॥ ४२ ॥
विज्ञानश्रीप्रभृतिललना लोभनीयाः प्रसन्नै-
रेवोदारैर्विनयरुचिरैः सामवाचां प्रपञ्चैः ।

---

१ ( आप्तात् लब्धात् ) सिद्धस्य सिद्धविद्यस्य चूर्णादिव । २ कान्तत्वं चारुत्वं पतिभावं च । ३ यथा शिवः सत्याः भवान्या आलिङ्गनं लभते तथा भवानपि बुद्धेः आलिङ्गनं लप्स्यते इति संवन्धः । मनसो हि बुद्धया ( गुणेन ) योगो न्यायसिद्धः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चेतस्तस्मान्नवसमुदिताम्भोदवत्सर्वथा त्वं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४३॥
अथ श्रीगुरुस्तुतिप्रस्तावनाय स्वकार्योपक्रमाय च चित्तं प्रार्थयमान आह—

गाढं पूर्णा जलधय इवामेयमाहात्म्यरत्नैः
स्तोतव्याः श्रीपरमगुरवः स्वान्त ! निर्णिक्तभक्त्या ।
अव्याक्षेपं तदनु कृपया मत्कृते त्वं यतेथा
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४४ ॥
चतुष्पञ्चाशता काव्यैः स्तुतिप्रकारमेव पूर्वं चित्तं प्रति शिक्षयति—

सर्वत्रापि प्रसृमरमहा यः परेषां हि तेज-
स्तेजोभाजामपि न सहतेऽतीवतीव्रप्रतापः ।
सूरः सोऽपि त्रिभुवनगुरौ किं महद्भिर्महोभिः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४५ ॥
मोहाम्भोधौ विषमविषयप्रोच्छलन्मत्स्यजाले
शृङ्गारारम्भःप्रभवमदनोत्तुङ्गरङ्गत्तरङ्गे ।
धीरत्वेन प्रभवति जनस्त्वां विना नैव कश्चि-
न्मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥ ४६ ॥
स्वामिन् ! धन्यो भवसि न कथं विश्वमान्यो यतस्त्वं
तत्त्वातत्त्वावगतिवशतोऽत्यन्तनिस्सङ्गचेताः ।
दुःखत्याज्यान्निखिलविषयांस्त्यक्तवान् पूर्वमेव
ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ॥४७॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विश्वाभीष्टे विभवनिवहे स्त्रीषु रूपाद्भुतासु
श्रीद्धे सौधे क्वचिदपि विभो ! रज्यसि त्वं न किञ्चित् ।
अन्ये शून्येऽपि हि ननु वने तत्र मुह्यन्ति यस्मिन्
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४८॥
सौम्यः क्व त्वं ननु मुनिपते ! शुद्धवंशाप्तजन्मा
निस्संबन्धं त्रिभुवनजनत्राणनिर्माणनिष्ठः ।
क्रूरः स्कन्द क्व स शशिभृता रक्षणार्थं सुराणा-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४९ ॥
त्वल्लीनानां भुवि जनमनः केकिनां का गतिः स्या-
न्नो चेत्प्राप्योन्नतिमनुपमां पूर्वमानन्दयेस्तान् ।
नो वा नव्याम्बुद इव यदि स्निग्धशिक्षोक्तिनादैः
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥ ५० ॥
नेतः ! पूता जिनगुणमयी रक्तभावप्रमुक्ता
वर्णश्लाघ्या न विहितमहामन्युहिंसाप्रवृत्तिः ।
त्वद्वाक्सिन्धुर्हसति न कथं तां विपर्यस्तरूपां
श्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्॥५१॥
मुक्तापङ्क्तिप्रवरसुभगं कीर्त्तिपूरं त्वदीयं
श्यामेऽन्तस्थे सति कुयशसि त्वाज्जितानां परेषाम् ।
आलोकन्ते कुतुकवशतः के न विस्तार्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ५२ ॥

---

१ शोभापूर्णे । २ मन्युर्यज्ञः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

त्वद्वत् कः स्यादुपकृतिपरो यत्परेषां हितार्थं
नानादेशान् विहरसि विभो ! पुण्यकारुण्यसिन्धुः ।
कीर्त्तिस्तोमैः स्फुटमिह दिशो द्योतयन् धर्मऋद्धिं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ५३ ॥
प्राप्तोऽलं कापुरुषविभुतां पङ्क्तिकिं दशास्यः
पाथोमुग्वा परममहतः पङ्कहर्त्तुः समस्ते ।
यद्यप्यग्रे पशुपतिवचांसीव शस्यश्रियेऽसौ
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ५४ ॥
अन्तः साम्यामृतरसमहावीचिभिर्निर्मले ते
नैव स्थानं हृदि गुणभृते केऽपि दोषा लभन्ते ।
तत्किं किञ्चित् कचिदपि बहिस्तद्विकृत्या अभावा-
दन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५५॥
उग्रो भीमो विषमनयनश्चर्मभृद्भैक्षवृत्तिः
षण्ढः कस्मादिह सह मया स्पर्द्धतेऽसावितीव ।
रोषात्कीर्तिस्तव सुरधुनीच्छद्मनारुह्य शीर्षं
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५६ ॥
हीरक्षीरस्मररिपुशरच्चन्द्रवच्छुभ्रवर्णा
युक्ता स्निग्धाञ्जनघननिभैर्वादिदुष्कीर्तिपूरैः ।
कीर्त्तिः स्फीता तव यतिपते ! पावनी स्वर्धुनीव
स्यादस्थानोपगतयमुनासङ्गमेनाभिरामा ॥ ५७ ॥

१ लङ्कापुरुषेषु राक्षसेषु विभुतां स्वामिताम् । अलं अत्यर्थं कापुरुषेषु विभुतां श्रेष्ठतां च ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पिण्डीभूतः परिमिततया भूतलस्याप्रमाणः
शुक्लो युष्मद्गुणसमुदयो व्याप्य विश्वं स्थितो यः ।
मेघः श्यामस्तदुपरि यदा स्यात्तदानीं स धत्ते
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५८ ॥
त्वं श्रीभास्वान् भवसि भुवने दुस्तमैस्तत्तमोभिः
संछन्नाशाः सपदि शरणं त्वामुपेताः समन्तात् ।
कुर्या वर्याभ्युदितविभवः सप्रकाशास्तदाशा
आपन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५९ ॥
सम्यक्तत्त्वावगमरहिता ये कुमार्गोपदेशैः
स्पष्टं नष्टाः स्वयमथ परान्नाशयन्ति प्रमुग्धान् ।
वैदुष्येण क्षिपसि सहसा तान् क्षणेनाप्यशेषान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः॥६०॥
ज्ञातं स्वामिन्नतिशयमहानेक एवासि विश्वे
साक्षात् सर्वाधिकगुणतया नापरः कश्चिदस्ति ।
यत्त्वां श्रित्वाऽधिगतपरमैश्वर्यसंपद्विलासाः
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ६१ ॥
गायन्त्युच्चैर्हिमगिरिगतास्त्वद्यशः किन्नरीणां
वर्गाः केचित् कतिचन पुनर्वादयन्ते सुवंशान् ।
चेन्मेघस्य स्फुरति मुरजस्येव नादस्तदायं
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ६२ ॥
माद्यद्विद्यावगमनमदोन्मादिनो वादिनो ये
ते निश्शेषाः सपदि भवता निर्जिता लीलयैव ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विश्वे तेषामसितकुशयो विस्तृतं तिर्यगुच्चैः
श्यामः पादो बलिनियमनाऽभ्युद्यतस्येव विष्णोः॥६३॥
वाहुल्येनाखिलभुवि गतः पूर्णमेकार्णवत्वं
स्वच्छातुच्छस्फटिकविशदस्त्वद्यशोराशिरिद्धैः ।
सान्द्रीभूतः प्रथयति महाश्चर्यलक्ष्मीं न केषां
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥६४॥
कैलाशाभ्युन्नतसितभवत्कीर्त्तिराशेः प्रसह्य
स्वेनोत्क्षिप्ते सति कुमतिनां दुर्यशश्चक्रवाले ।
श्रीसूरीश ! स्फुरति सुषमा काऽप्यपूर्वा पृथिव्या–
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६५ ॥
निस्तुल्यार्थावलिमणिमयैः शास्त्रसानुप्रतानै–
र्विश्वगव्याप्तो जिनमतमहारोहणाद्रिश्चकास्ति ।
तस्मिन्नव्यानघमणिगणानिच्छतां वाक्प्रवन्धैः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६६ ॥
हा ! गच्छन्तु क शरणमिमाः शिष्यसारङ्गमालाः
प्रीणास्युच्चैर्जलद इव चेन्नैव पुण्यामृतेन ।
वाणीरूपैस्त्वमपि यदि वाऽभीष्टलाभाशयोक्ताः
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भापयेस्ताः ॥ ६७ ॥
श्रीमान् श्रेयःप्रततिसुभगः सत्फलप्राप्तिहेतु–

१ जगति । जगद्वाचकस्य हि विश्वशब्दस्य सर्ववाचि–सर्वशब्दसाहचर्या-न्न सर्वनामत्वम्; तेन न स्मिन्नादेशः। २ इद्धः दीप्तः। ३ सुषमा परमा शोभा। ४ श्रेयांसि पुण्यानि तेषां प्रततयः पङ्क्तयस्ताभिः सुभगः, अन्यत्र श्रेयस्यः श्रेष्ठा याः प्रततयो लताः ताभिः सुभगः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्फारोदारागमपरिगतो जैनधर्मः क्षमाभृत् ।
त्वत्स्वायत्ता नियतमखिला तस्य संपत्ततस्त्वं
नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६८ ॥
कृत्वा यात्रां विजयिनि समाजग्मुषि प्राप्तविश्वै-
श्वर्ये युष्मद्यशसि नृपतौ वल्लभे सानुरागा ।
वर्षालक्ष्मी रसरभसतः प्रक्षरद्वारि धत्ते
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६९ ॥
अत्यौन्नत्यश्रियमधिगतं तुङ्गशृङ्गाग्रभागाः
स्फूर्जज्ज्योत्स्नाधवलयशसं श्वेतवर्णाः सुधाभिः ।
चित्रोल्लासिप्रवरविभवं चित्रतो दर्शनीयाः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ७० ॥
भक्तिव्यक्तिहृदयफलके कुन्दमाला विशाला
वाचः पुण्याः श्रवणयुगले मञ्जुलाम्भोजभूषाः ।
सम्यग्धर्माधिगमसजुषां शासनं जैनचन्द्रं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ७१ ॥
तस्यां तस्यां पुरि परहितस्त्वं वितन्वन् विहारं
क्रूरात्मानं तमपि सहसा मोहमल्लं निहंसि ।
जेतुं शक्ताः कथमपि न यं शौर्यभाजोऽपि योधाः

---

१ आगमाः सिद्धान्ताः, अन्यत्र अगमा वृक्षाः । २ क्षमाभृत् पर्वतः । ३ कामिनीव वर्षाविजयलक्ष्मीः मुक्ताजालग्रथितं अलकं इव प्रक्षरद्वारि अभ्रवृन्दं धत्ते इति संबन्धः । ४ जैनशासनरूपस्य नीपस्य कदम्बपुष्पस्य सीमन्त ( शिरो )धार्यत्वं सुघटितम् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रत्यादिष्टाभरणरुचयश्चन्द्रहास[1]व्रणाङ्कैः ॥ ७२ ॥

त्रिभिर्विशेषम् ।

चेतोरङ्गे दृढतमगुणे सन्मतिर्नर्त्तकीयं
त्वच्छिष्याणां परमनिपुणा नृत्यति स्फुर्तियुक्ता ।
इष्टानर्थान् समभिलषतां शास्त्रतत्त्वोपदेशे
त्वद्गम्भीर[2]ध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ७३ ॥

विश्वस्वामिन्ननुपमगुणैस्तीर्थकृत्तुल्यता ते
प्रज्ञोन्मेषे सति तनुमतां व्यज्यते व्यक्तमेव ।
यद्वत्तैस्तैर्गतिरभसतः स्रस्तपुष्पादिभावै-
र्नैशो[3] मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥७४॥

यद्वा—

माद्यद्वादित्रजमदतमःस्तोमनिर्नाशकस्या-
त्यन्तं मुक्तास्तमनविपदः सर्वदाप्तोदयस्य ।
चिह्नै रात्रावपि हि विदितैस्त्वत्प्रतापस्य[4] सत्के-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥७५॥

---

१ चन्द्रहासः खड्गः । २ त्वद्गम्भीरध्वनिरूपेषु पुष्करेषु वाद्य-भाण्डेषु वाद्यमानेषु शिष्यहृदयरूपायां नाट्यशालायां सुबुद्धिरूपा नर्त्तकी नृत्यतीत्याशयः । ३ निशायां गमनविषयीकृतः कामिनीनां अभिसारिकाणां मार्गो यथा सूच्यते तथेति पूर्वार्धेन संवन्धः । ४ त्वत्प्रतापस्य रात्रिन्दिवं तथात्वेनैव वर्तमानस्य चिह्नैः सूर्योदयेऽपि कामिनीनां रात्रिसंवन्धी एव मार्गः सूच्यते इति संवन्धः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तैस्तैर्नानाशयविलसितैर्लिङ्गयुक्तिप्रयोगै-
मर्मस्थानाक्रमणवशतश्चाकुलानां परेषाम् ।
मौढे पत्यौ त्वयि चलदृशां वाक्यरूपोऽबलानां
व्हीमूढानां भवति विफलः प्रेरितश्चूर्णमुष्टिः ॥ ७६ ॥
पूर्वं स्फूर्जत्तरमदभरादागतानां क्षणेन
त्वत्क्षिप्तानां क्षुभितमनसां वादिवृन्दारकाणाम् ।
अन्तःसर्पत्परिभवभवाः श्वासदण्डाः कवोष्णा
धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७७ ॥
सर्वाभीष्टाः सततममृतस्यन्दरम्या जनाना-
मन्तर्दाहं सपदि शमयन्त्येव वाचस्त्वदीयाः ।
क्लेशं घर्मोद्भवमिव शरच्चन्द्रपादप्रणुन्ना
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७८॥
तेष्वत्यन्तं न किमु निखिलाः सप्रकाशाः सदाशाः
किं वा नैव प्रमदकुमुदोल्लासलक्ष्मीरनल्पा ।
ये राजन्ते प्रसृमरभवद्वक्रपूर्णेन्दुवाणी-
नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥७९॥
कैवल्याख्यं पदमसुलभं लभ्यते त्वत्प्रसादा-
दास्तामन्यत्तदिह विदितं देवलोकादि रम्यम् ।
शश्वद्विश्वत्रयजनमनोहारिरूपाः सलीलं
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ८० ॥

---

१ अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति लिङ्गत्रयं न्यायशास्त्रप्रसिद्धम् । लिङ्गं पुरुषचिह्नमपि । २ परेषां प्रतिवादिरूपाणां चलदृशां चञ्चललोचनानां अबलानां स्त्रीणामिति योजना ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कारुण्येनोपदिशति हितं निर्विशेषं समेषां
तत्त्वज्ञेऽपि त्वयि सति जगत्तारणैकप्रवीणे ।
धिग् व्यामोहं कतिचन परे भ्रान्तचित्ता वधूभि-
र्बद्धापानं वहिरुपवनं कामिनो निर्विशन्ति ॥ ८१ ॥
चिन्तातीताखिलसुखकरीं त्वत्प्रसत्तिं दुरापां
प्राप्य स्वर्गं परिमितसुखं कः समीहेत विद्वान् ।
यद्यप्यत्र त्रिदशतरुणीकामितं सर्वदैवा-
ऽप्येकः सूते सकलमवलामण्डनं कल्पवृक्षः ॥ ८२ ॥
ये मोहान्धा घनधनमदावेशनश्यद्विवेका
मन्दायन्ते तव पदयुगोपासने भाग्यलभ्ये ।
दुःखं प्राप्स्यन्त्युपनतजराद्यामदस्ते नृणां किं
वित्तेशानां न खलु च वयो यौवनादन्यदस्ति॥८३॥
एषा योषा जगति कुगतिद्वारमेवं विदित्वा
येन त्यक्ता रज इव परब्रह्मलक्ष्मीरतेन
जेतुं तं त्वां प्रभवति कथं चित्तभूर्हन्त ! यस्मा-
त्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ८४ ॥
स्निग्धच्छायः सुपरिकरितः साधुपात्रैरमात्रै-
र्मङ्गल्यश्रीरभिमतफलश्लाघनीयस्त्वमेव ।
विश्रामार्थं जगति विधिना निर्मितः शर्महेतु-
र्हस्तप्राप्यस्तवकनमितो वालमन्दारवृक्षः ॥ ८५ ॥

---

१ सर्वेषाम् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चित्रं जाड्य[1]प्रसररहितः संवरैः पूरितस्त्वं
कासारस्त्वं श्रयसि सुभगः स्मेरपद्मावलीभिः ।
तज्जानेऽहं जडै[2]परिचितं मानसाह्वं सरस्त–
न्न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः॥८६॥
यः सन्तापं शमयति भुवः पुष्करावर्त्तमेघो
यो वाऽत्यन्तं जगति बहुधाऽन्योपकारं विधत्ते ।
विद्युद्दीप्रप्रसृमरमहोभास्वरत्वेन साक्षात्
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ८७ ॥
रागाक्रान्तं त्रिजगदखिलं विश्ववन्द्यं विना त्वा–
मास्तामन्यः सुरतनिरतो हन्त वृक्षोऽपि कश्चित् ।
अम्भोजाक्ष्याः कुचयुगदृढालिङ्गनस्याभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदछद्मनाऽस्याः ॥८८॥
स्वामिन्[3] ! शिष्यावलिवरवनीं पुण्यसंपल्लवाढ्यां
शिक्षातोयैर्नयसि नितमामुन्नतिं श्रीघनस्त्वम् ।
चेतोहारी कलियुगरजन्युद्गमात् सद्गुणौघो
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्भिः ॥ ८९ ॥
विश्वाराध्ये गुणवति गुरौ त्वय्यपि प्राणिनो ये
साक्षादीर्ष्याकलुषितहृदः प्रातिकूल्यं प्रपन्नाः ।

---

१ जाड्यं अज्ञत्वं शीतत्वं च; शीतत्वरहितत्वं च कासारस्य सरस आश्चर्यापादकम् । २ जडैः । डलयोरैक्यात्, जलैः, अज्ञैश्च परिचितं संगतम् । ३ संपदां लवाः, सम्यक् प्रकाराणि पल्लवानि च तैराढ्यां शिष्यमण्डलीरूपां वनीं श्रीघनः लक्ष्मीपूर्णे मेघश्च त्वं नितमां अनवरतं उन्नतिं नयसीत्यर्थयोजना॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मन्ये मेघस्तदुपरि रुषेवात्र वर्षासु धत्ते
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ९० ॥
नित्यं स्फारीकृतगुणगणः सर्वदोषान्तकस्त्वं
वृद्धिं किञ्चिन्न खलु सहसे क्वापि दोषाकरस्य ।
भूयो भूयः क्षयमयदिदं तेन किं बिम्बमुच्चै-
रिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ ९१ ॥
वादिश्रेणी विपिनमगमत्त्वज्जिता तत्र यात्र-
द्रातुं लग्ना सकरुणमसौ दुःखविस्मारणार्थम् ।
मुह्यत्येषा घनतमशुचा तावता शून्यभावा-
द्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥९२॥
कीर्त्तिः कान्ता भ्रमति भवतः सर्वतस्त्यक्तशङ्का
दूरेऽप्येका जगति विगतव्रीडमाक्रीडते च ।
ब्रूहि स्वामिन् ! किमु समुचिताः संभवेयुः सतीनां
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ९३ ॥
श्रुत्वा नामाऽपि हि तव भिया व्याकुला वादिनोऽमी
जातोत्कम्पास्तरलनयनाः काकनाशं प्रनष्टाः ।
तेषां योषाः सुचिरमभवन् दुःखिताः सारयन्त्यो
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ९४ ॥
दीना मीना इव जगति ये प्राणिनस्त्राणहीना-
स्तान्निःशेषान्निखिलभुवनोद्धारबद्धावधानः ।
त्वं कारुण्याधिगतहृदयस्त्रायसे धीवरोऽपि
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९५ ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

त्वत्तो गाढं परिभवभयाद्वादिवृन्दे प्रनष्टे
गच्छन्तीनामनुपतिपथं योषितां दुःखितानाम् ।
अध्वश्रान्ते रतिमृदुतया कम्पभावाच्च कामं
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ९६ ॥
नानायुक्तिप्रहरणगणैर्दुर्जयान् वादिराजान्
जित्वा कान्ता विजयकमलाऽत्यन्तरक्ता त्वयेश ! ।
जातोत्कण्ठं कथमपि तथाऽऽलिङ्गिता, नो यथा स्यात्
सद्यःकण्ठच्युतभुजलताग्रन्थिगाढोपगूढम् ॥ ९७ ॥
स्तोतुं शक्याः किमिव गुरवोऽनन्ततत्तद्गुणानां
यस्मात्तेषां जयति चरितं विश्वविश्वाभिशायि ।
यासि स्वान्त ! स्वयमपि यदि त्वं तदा भावि तावत्
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥९८॥

अथ श्रीगुरुस्तुतिमुपसंहरन् दशभिः काव्यैः श्रीगुरुपादा-
नामात्मस्वरूपज्ञापनाय चित्तं प्रति प्रेरयति—

एवं स्तुत्वा परमगुरवो ज्ञापनीया मदीयं
तत्तादृक्षं स्वयमवगतं यादृगस्ति स्वरूपम् ।
योग्ये स्थाने भवति सफला प्रार्थना प्राणभाजां
सूर्यापाये न खलु कमलं पुष्पति स्वामभिख्याम् ॥९९॥
निस्सामान्याभ्युदयकमलाप्रापणप्रत्यलायां
रक्तः सोऽयं कथमपि तथा त्वत्प्रसत्तौ[1] प्रियायाम् ।

---

१ त्वत्प्रसत्तिः भवदनुरक्तिः तद्रूपायां प्रियायां तथा रक्तो यथेत्यु-त्तरार्धेन संबन्धः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तस्यावश्यं हरति न यथा मानसं कामिनी सा
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥१००॥
या ज्ञानश्रीः सकृप ! भवता सुप्रसन्नेन तस्मै
दत्ता दुःखव्यपगमकरी चित्तविश्रामधाम ।
प्रम्लानां तामपि निजसखीविप्रयोगादिदानीं
जातां मन्ये तुहिनमथितां पद्मिनीं वान्यरूपाम् ॥१०१॥
सोऽयं[1] तस्या गुरुविरहतो भ्रान्तचेताः समन्ता–
त्तामेवालोकयति परितः कल्पनाक्लृप्तरूपाम् ।
दृष्ट्वा पृच्छत्यपि हृदयजस्नेहतो हे प्रिये ! त्वं
कच्चिद्भर्तुः स्मरसि रसिके ! त्वं हि तस्य प्रियेति॥१०२॥
वात्सल्यं ते जगति परमं तन्न तस्मिन्नुपेक्षा
युक्ता भक्ते ! प्रगुणय न किं तां यतस्त्वद्वशे सा ।
उद्विग्ना या किमनुनयते मानिनीं नालिवर्ग–[2]
स्तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ १०३ ॥
तिष्ठन् गच्छन् स्वयमुपविशन् वापि जाग्रत्स्वपन्ना
गाढं दुःखी सविवशमना[3] ध्यायति त्वत्प्रसत्तिम् ।
या स्वाभीष्टा स्मरति न कथं वासरान् पान्थराजी
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती ॥ १०४ ॥
दुःखोद्रेकात्सततगलितैः प्लाविता बाष्पपूरैः
शक्ता नैवोल्लसितुमलसा कातरा तस्य दृष्टिः ।

१ सोऽयं मद्रूपो जनः । तस्याः ज्ञानश्रियाः । २ सखीजनः । ३ सवि-
वशं अरिष्टदूषितं मनो यस्य तथाभूतः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रोहन्मोहाद्विरचिततनोर्दर्शनं त्वत्प्रसत्ते–
राकाङ्क्षन्ती नयनसलिलोत्पीडरुद्धावकाशम्॥१०५॥

गाढोद्वेगप्रभवजडतायोगतो मुद्रितत्वं
तत्प्राप्त्याशाजनितपरमानन्दतः स्मेरभावम् ।
आबिभ्राणा स्फुरति नियतं सांप्रतं तस्य बुद्धिः
साभ्रेऽह्नीव स्थलकमलिनी न प्रबुद्धा न सुप्ता॥१०६॥

आशाबद्धो गमयति दिनान् दैन्यवानेष साक्षा–
त्तस्य स्वामिन्! यदि न भविता सङ्गमस्त्वत्प्रसत्तेः ।
स स्तोकाम्भःस्थितशफरिकेवातिदुःखातिरेका–
न्मीनक्षोभाचलकुवलयश्रीतुलामेष्यतीति ॥ १०७ ॥

कोऽप्येतस्मादिह पुरवरादागतः स्यादकस्माद्
दृष्ट्वाऽत्यन्तं सपदि मुदितोऽत्यन्तसम्भ्रान्तवृत्तिः ।
सोल्लासं ते कुशलमनिशं पृच्छति स्वच्छभावः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०८ ॥

अथ पूर्वोक्तमुपसंहरन् पञ्चदशभिः काव्यैश्चित्तं प्रति श्री-
गुरुराजप्रसत्तिप्रियाविषयं सन्देशसर्वस्वमुपदिशति—

एवं दीव्यद्गुणजलनिधीन् वर्यगाम्भीर्यभाजः
पाठीनौघैश्चिरपरिचितान् श्रीगुरून् ज्ञापयित्वा ।

१ पाठिनां अध्ययनशीलानां शिष्याणां इनाः प्रवरास्तेषां, पाठीनानां सहस्रदंष्ट्राणां मत्स्यविशेषाणां च ओघैः समूहैः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

साक्षाल्लक्ष्मीमिव वर सखे ! तां प्रसत्तिं प्रसन्नै–
वक्तुं धीरस्तनितवचनैर्भामिनीं प्रक्रमेथाः ॥ १०९ ॥

प्राणाधारस्त्वमसि दयिते ! तद्विना सङ्गमं ते
प्रत्यर्थीव व्यथयति भृशं मेघपूरः कृशं माम् ।
पाथोदः किं ग्लपयतितमां नो कुलान्यध्वगानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥११०॥

निस्संबन्धं हितकरतया बिभ्रता मित्रभावं
केनाप्येषाऽखिलसुखकरी ढौकिता भाग्ययोगात् ।
त्वद्वार्त्ताऽपि प्रथयति ममामन्दसंमोदलक्ष्मीं
कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः ॥१११॥

रात्रौ यद्वद्भवति विरहाच्चक्रवाकोऽतिशोका–
क्रान्तस्वान्तोऽहकमपि तथा सर्वथाऽप्यस्मि दुःखी ।
कान्ते ! तन्मे न खलु हृदये सौख्यलेशः कदाचित्
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥११२॥

त्वद्योगायाऽभिमतफलदां श्रीगुरूणां सपर्यां
यो निर्मातुं विनयविधिना स्पष्टमिच्छेत्प्रहृष्टः ।

---

१ ‘ वरसखे ’ इति व्यस्तं पदद्वयम्; समस्तत्वेन हि मन्यमानेऽस्मिन् समासान्तटप्रत्यय आपद्येत । २ मे मम अघपूरः, पापसमूहः; प्रसत्तेश्च दयितात्वेन सूचितायाः संगमं विना मेघकृतं व्यथनं युक्तमेव । ३ अहम् । अहकमिति अकजन्तं रूपम् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सोऽयं सम्यक् प्रणयमधुरं सस्पृहं साभिसन्धि
त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ११३ ॥
औदार्यं स्वस्तरुषु गुरुतां मेरुशैले शुचित्वं
सौन्दर्यं वा शरदिजविधौ शीतलत्वं सुधायाम् ।
उत्प्रेक्षेऽहं जगदनुपमं द्रष्टुकामः स्वरूपं
हन्तैकस्थं क्वचिदपि न ते भीरु! सादृश्यमस्ति ॥११४॥
ब्रूहि त्वं मे ननु तव विना सङ्गमालोकमेकं
हा ! नेष्यन्ते कथमिव मया दुःखिना दुर्दिनानि ।
अन्तःस्फूर्जद्विरहदहनप्रोच्छलद्धूमलेखा–
दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि ॥ ११५ ॥
धन्या मान्या विनयनिरता ज्ञानसंपत्समृद्धाः
पुण्यात्मानः सुगुणनिधयः साधवो ये मिलन्ति ।
आलिङ्ग्यन्ते प्रणयसुभगं ते मयाऽतिप्रमोदात्
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ११६ ॥
वृत्तोदारे हृदयसदने कल्पनातल्पगां त्वां
कृत्वा यावद्रभसविवशः किञ्चिदिच्छामि वक्तुम् ।
तावद्दैवाद्द्रुतमुपनता मूढता बाधते मां
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥११७॥
तुष्टश्रीमद्गुरुकृतभवत्सङ्गपीयूषपूरः
शीतः सद्यः शमयतुतमां तद्वपुर्दुःखिनो मे ।
अत्यन्तं यद्हृदयदयिते ! दुस्सहाभिः प्रसर्प–
द्गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥११८॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

निस्सारेऽस्मिन् प्रकृतिविरसे भूरिदुःखेऽल्पसौख्ये
संसारे किं भवति वहुना फल्गुना शोचनेन ।
यस्माज्जन्मान्तरविरचितैः कर्मभिर्देहभाजां
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ११९ ॥
कुर्वे किं वा गुणवति ! भवद्विप्रलम्भोत्थदुःखात्
प्राप्तोत्कर्षात् प्रसरतितरां दुर्धरो वाष्पपूरः ।
किं नो शोकात्पथि विरहिणां श्रस्तरेषु स्थितानां
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेषाः पतन्ति॥ १२० ॥
तन्मे भाग्यं क नु यदुदयात्तोषितश्रीगुरुभ्यः
संयोगं ते भृशमसुलभं प्राप्य पीनप्रमोदौ ।
आवां तत्तत्सुखमभिमतं सङ्गतौ दम्पती वा
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ १२१ ॥
नान्या काचित् कचिदपि सती त्वत्समा तन्न ते मां
त्यक्तुं युक्तं त्वयि कृतरतिं यत्तदुत्प्रेक्ष्य मिथ्या ।
अन्यस्त्रीभिः पतिरपगुणस्त्यज्यते यद्वदुक्त्वा
दृष्टः स्वप्ने कितव ! रमयन् कामपि त्वं मयेति ॥१२२॥
एकान्तेन त्वरयतितरां वल्लभे विप्रलम्भो
व्यामूढं मां तव नवघनाश्लेषसौख्योत्सवाय ।
वाञ्छाः प्रायो ननु तनुमतां प्रत्यहं प्राप्यभावा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ १२३ ॥

---

१ असारेण । २ मोक्ष्यावहे ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अथ चित्तस्य शक्तिचातुर्यदर्शनपूर्वं सर्वं स्वकृत्यं व्यक्तया प्रतिपादयति—

त्वय्येवेयं ननु निरुपमा चातुरी शक्तियुक्ता
भ्रातश्चेतः! कथितमखिलं कृत्यमेतन्मया तत् ।
दत्से पुंसां नियतमवदन्नेव सर्वार्थसिद्धिं
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥१२४॥

मत्सन्देशैः स्तुतिसहचरैः श्रीगुरूंस्तोषयित्वा
नीत्वा प्रीत्याऽनुनयपदवीं वल्लभां च प्रसत्तिम् ।
व्यावृत्तः सन् पुनरपि सखे! तद्वचोभिर्ममेदं
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ १२५ ॥

अथ स्वकृत्यं सर्वमुपसंहरन् स्वार्थसिद्धिसम्भावनाप्रीतः सकलदुःखोच्छेदावन्ध्यहेतुभूतहितोपदेशपूर्वं मद्गुरुस्नेहोऽयं प्रियावियोगस्तवमा भूदित्याशीर्वादेन चित्तं प्रमोदयति—

एतत्कृत्वा परहितरत! स्वान्त! नित्यं गुरूणां
सेवासौख्यानुभवपरमानन्दलीनो भव त्वम् ।
सच्चिल्लक्ष्म्या जलमुच इवात्यन्तमौन्नत्यभाजो
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥१२६॥

---

१ सत्–चिद्रूपया संपदा विप्रयोगो विरहो मा भूत् न भवतु यथा जलमुचो मेघस्य विद्युता सह वियोगो न भवति । जलमुच इति साकूतं पदम् । तेनैतद् व्यक्तं यज्जलमोचनशीलस्य हि मेघस्य विद्युता सह वियोगो न भवतीति ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अथ स्वकार्यसिद्धिं दर्शयति—

कान्तं स्वान्तं द्रुतमवहितं निर्ममे तत्तथैवाऽ-
भूवन् श्रीमत्परमगुरवो विश्वपूज्याः प्रसन्नाः ।
सोल्लासाऽभूत्सपदि हृदयस्वामिनीव प्रसत्तिः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥ १२७ ॥

ज्ञात्वा सम्यग् व्यतिकरमिमं जातकारुण्यपूरैः
श्रीसूरीन्द्रैः श्रितहितकरैस्तूर्णमेव प्रणुन्ना ।
सा संश्लिष्य प्रसृतपरमानन्दमेदस्वलंतं
भोगानिष्टानभिमतसुखान् भोजयामास शश्वत् ॥ १२८ ॥

सन्ति श्रीमत्परमगुरवः सर्वदाऽपि प्रसन्ना-
स्तेषां शिष्यः पुनरनुपमाऽत्यन्तभक्तिप्रणुन्नः ।
तन्माहात्म्यादपि जडमतिर्मेघदूतान्त्यपादै-
श्चेतोदूताभिधमभिनवं काव्यमेतद्व्यधत्त ॥ १२९ ॥

॥ इति श्रीचेतोदूताभिधकाव्यं समाप्तम् ॥

P. P. Ac. Gunratansuriji M.S.　Jin Gun Aaradhak Trust